MSS No. 330 Subject PHILOSOPHY

Name of MSS महिम्नस्तोत्र

Author गंधर्वराजपुष्प दन्त

Period ______ Folios 10

Script SANSKRIT Source Prithi Pal Singh

Missing Folios N.A.

महिमनस्तोत्र; गंधर्वराजपुष्पदन्त कृत; बृहस्पति, ६ कार्त्तिक सुदि १८११ वि० लि०
१० पत्रक॥ ला० अ० १६ पं० प्र० पृ०

ह० ला०

महि॰ स्तो॰ १ ।

श्रीगणेशायनमः॥ ॐ हे भगवन् ते तव महिम्नः परं पारं अविदुषः पुंसः अज्ञानतः पु
रुषस्य स्तुतिर्यदि असदृशी स्यात् अननुरूपा अयोग्या भवेत् तथा ब्रह्मादीनामपि गिरस्त्व
यि विषये अवसन्ना भवेयुः निष्फला भवंति तत्तस्मात्कारणान्न केवलमस्माकमेव स्तुते
रनधिकारित्वं ब्रह्मादेरपि तथैव स्यादित्यर्थः एतेन पूर्वार्द्धेन स्तुतेरनधिकारित्वं प्रत्य
पादि उत्तरार्द्धेन साधिकारित्वं प्रतिपादयन्नाह हे भगवन् अथैवं ब्रूषे यतः सर्वः ॥
महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः अथा
वाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः
१ समस्तोपि जनः स्वमतिपरिणामावधि स्वकीया मतिः स्वमतिस्तस्याः परिणामः परि
पाकः स एवावधिः सीमा मर्यादा यत्र स स्वमतिपरिणामावधि यथा भवति एवं त्वां गृणन्
स्तुवन् अवाच्यो ऽनुग्राह्यो भवति निर्दोष एव यद्येवं तर्हि हे हर हे दीनार्तिहर अस्मिन् स्तो
त्रे ममापि एषः परिकरः प्रारंभो निरपवादो निर्दोष एव १ हे भगवन् यस्तव महिमा वा
ङ्मनसयोः पंथानं अतीत एव वाक च मनश्च वाङ्मनसे तयोर्वाङ्मनसयोः एते च किल वाङ्म १

शिव।

IA

नसेसर्वार्थविषयिणी ताभ्यामपितवमहिमाऽवधारयितुंपरिज्ञातुंनशक्यतेनच
प्रत्यक्षेणअनुमानेनगृह्यते सकः यंतवमहिमानंश्रुतिरपिवेदोपिचकितंअभिधत्ते
भीतभीतंब्रूतेननिश्च यतः कयाअतद्व्यावृत्त्या नतत्अतत्अतद्रूपाचासौव्यावृत्तिश्च
अतद्व्यावृत्तिस्तयाअतद्व्यावृत्त्यासइत्थं अतीतः पंथानंतवचमहिमावाङ्मनसयो
रतद्व्यावृत्त्यायंचकितमभिधत्तेश्रुतिरपि सकस्यस्तोतव्यः कतिविधगुणः कस्यवि
षयः पदेत्वर्वाचीनेपततिनमनः कस्यनवचः २ भूतोमहिमाकस्यस्तोतव्यः अपितुन
कस्यापीत्यर्थः तथाकतिविधगुणस्तस्यभगवतः कियंतोगुणाः तेपरिज्ञातुंनश
क्यंते कस्यविषयः कस्यगोचरोभवेत् अपिनतुकस्यापीत्यर्थः एतेननिष्कलस्व
रूपेणस्तुतेरनधिकारित्वंप्रतिपादितं सकलसावकाशत्वंप्रतिपादयन्नाह तुपु
नः अर्वाचीनेसृष्टिस्थितिप्रलयमुख्यतयापदेस्थानेकस्यमनोनपततिवाचोवाक
स्यनप्रसरंति अपितुसर्वेषामपिमनोवाचश्चप्रसरंति २ भगवतोऽशेषशास्त्र
कर्तृत्वंप्रतिपादनायआत्मनऔद्धत्यपरिहारयन्स्तुवन्नाह मधुस्फीति॥ हेभगव

म· हि· अमस्तुत्या तव तुष्टिर्नास्त्येव किं कुर्वतस्तव वाचो गिरो निर्मितवतः सृष्टवतः कथंभूताः
टी· वाचः मधुस्फीताः मधुवत्स्फीताः कोमला माधुर्यगुणयुक्ताः सालंकारा इत्यर्थः पुनः क
२ थंभूताः परमंमृतं परमामृतस्वरूपाः परमामृतस्वरूपास्तत्त्वेनोच्यते उपचाराद्वेदान्त
५न सिद्धान्तनिष्ठाः एतेनैतदुक्तं मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मणोऽपि वा
गपि सुरगुरोर्विस्मयपदं मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थोऽस्मि
न्पुरमथन बुद्धिर्व्यवसिता ३ यो निष्टा वाचो गिरो निर्मितवतः सुरः गुरोरपि वाक् किं
तव विस्मयपदं भवति आश्चर्यस्थानं भवति अपि तु न भवतीत्यर्थः किं पुनरस्मदा
देः अहो यद्येवं तर्हि किमर्थं स्तुतौ प्रवर्तसे सत्यं तु पुनः हे पुरमथन त्रिपुरदहन अ
स्मिन्स्तुतिलक्षणेऽर्थे मम बुद्धिरिति कारणात् व्यवसिता कृतोद्यमा इतीति किं अहं भ
गवतो गुणकथनपुण्येन एतां आत्मीयां वाणीं पुनामि पवित्रीकरोमि ३ ॥ कृष्ण ॥ परमा
त्मने नमः ॥ आत्मस्तुतेः सावकाशत्वं अव्यभिचारित्वं प्रतिपाद्य इदानीं सर्वज्ञत्वं सर्वकर्तृत्वं
प्रति केचिद्विप्रतिपद्यन्ते मीमांसकादयस्तन्मतनिराकरणाय अपि न वेद्यप्रमाणोपन्या
सपरेण श्लोकत्रयेण भगवंतं नुनावेत्याह तवइति हे भगवन्हे वरद यत तवैश्वर्यं त २

यस्तंनिक्षिप्तंआरोपितंच कास्तुतिसृषुतनुषु कथंभूतास्तुगुणभिन्नास्तुगुणाः सत्वर
जस्तमांसितैर्भिन्नाः पृथग्भूता गुणभिन्नास्तास्तु कथंभूतंतत् वैश्वर्यं जगदुदयर।
तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु॥
अभव्यानामस्मिन्वरदरमणीयामरमणींविहंतुंव्याक्रोशींविदधतिइहैकेजडधियः ४
क्षाप्रलयकृत्त्रयाणांजगतांउत्पत्तिः रक्षापरिपालनंप्रलयोविनाशस्तेति भगवा
न्करोतीति पुनः कथंभूतं त्रयीवस्तु त्रयीशब्देनवेदत्रयी अथवाब्रह्मविष्णुरुद्रात्म
कंरूपंहेभगवन्इहमर्त्यलोके एकेजडधियोमंदमतयः पापिष्ठामीमांसकादयस्त
वैश्वर्यंस्फोटयितुंनिराकर्तुंव्याक्रोशींनिंदांविदधतिकुर्वंति कथंभूतांव्याक्रोशीं
अभव्यानांपापिष्ठानांरमणीयांमनोरमांपुनः कथंभूतां अस्मिन्सर्वज्ञादिगुणैर्युपे
तेतवैश्वर्येअरमणीं ४ इदानींतामेवव्याक्रोशींप्रकटयन्नाह खलुनिश्चितंस
धातासकर्तात्रिभुवनंसृजति त्रिभुवनजननेकाईहाकाचेष्टाकापरिस्पंदक्रि
या तयाकिंकायः सन्त्रिभुवनंसृजति तयाकिमुपायः सधाताकिमुपायः स
न्त्रिभुवनंकिमुपादानंकिंकारणंकिंनिमित्तंआश्रयमितिकुर्वंतकः कश्चिद्दुतधि

महिम्न टी ३ योमंदमतीन्सुरवरयतिवाचालयति किमर्थं ॥ ॥ ॥ ॥ ॥

किमीहः किंकायःसखलुकिमुपायस्त्रिभुवनंकिमाधारोधातासृजतिकिमुपादानइतिच॥

अतर्क्यैश्वर्येत्वय्यनवसरदुस्थोहतधियःकुतर्कोयंकांश्चिन्मुखरयतिमोहायजगतः ५

जगतोमोहायविप्रतारणाय नरकगमनायच कथंभूतःकुतर्कः त्वयिविषयेअ

3 नवसरदुस्थः ॥दुर्बलइतिअनवसरदुस्थः किंभूतेत्वयि॥अतर्क्यैश्वर्ये अचिं

त्यमहत्वे यतउक्तंइछयाकुरुतेदेहमिछयावितनुर्भवेत् क्रीडतेभगवाल्लोकेबा

लःक्रीडनकैरिव ५ ॥श्रीराम॥ श्रीकृष्ण॥ ॥ ॥ ॥ ॥ ॥ ॥

हेभगवन्अमीभूर्भुवःस्वःप्रभृतयःसप्तलोकाःअवयववंतोपिअजन्मानःएषांज

न्मनविद्यते यद्यत्सावयवंतत्जन्मयुक्तं यथाघटः तथाकाःसावयवाःसावय

वत्वाज्जन्मवंतएव हेभगवन्भवविधिःसृष्टिविधानंजगतांअधिष्टातारंचेतनंनि

मित्तकारणमीश्वरंकिंअनादृत्यभवति अनपेक्ष्यभवति नैवकर्त्तारमपेक्षते ए

वंदिक्कालधर्माधर्मपरमाणुप्रभृत्यनिचेतनान्यमून्यानिचेतनाधि ॥ ॥ ॥ ॥ ॥

अजन्मानोलोकाःकिमवयववन्तोपिजगतामधिष्टातारंकिंभवविधिरनादृत्यभवति॥

अनीशोवाकुर्याद्भुवनजननेकःपरिकरोयतोमंदास्त्वांप्रत्यमरवरसंशेरतइमे ६
ष्टानस्वीकृतानिस्वकार्योत्पत्तौप्रवर्त्तते यच्चेतनाशून्यंतच्चेतनाधिष्ठानमस्वीकृतंका
र्योत्पत्तौप्रवर्त्तते॥अथवाभीधीयेदिअनेशःकुर्यान्महदैश्वर्यवर्हिर्भूतः कश्चित्कुर्यात्त
दातस्यअनीशस्यभुवनजननेभुवनोत्पादनविधौकःपरिकरःकासामग्री हेअम
रवरयतेवायकारणादिमेमंदाःपापिष्टामीमांसकादयस्त्वांप्रतिसंशेरतेसंदेहंकुर्व
ति त्वांप्रतिसंदेहोनास्तीतितात्पर्यार्थः॥ ६॥ ॥॥ त्रयीवेदविहितोमार्गः सांख्यक
पिलंशास्त्रंपंचविंशतितत्वोपलक्षितंवा तथायोगसंबंधःतत्प्रधानत्वात् न्याय
शास्त्रंवैशेषिकशास्त्रं तथापशुपतिमतशब्देनसिद्धांताःपरिकीर्त्तिताः सोमसि
द्धांतशिवसिद्धांतनाकुलसिद्धांतपंचार्थःसिद्धांतइत्यादयः तथावैष्णवंकेशवपं
चरात्रनारदपंचरात्रयोर्ग्रहणं इतिशब्दसमाप्तौवर्त्तते एतत्पंचसंख्यापरिछि
न्नप्रस्थानं एतस्मिन्प्रस्थानेप्रभिन्ने ॥ ॥ ॥॥ ॥ ॥ ॥ ॥ ॥
त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदःपथ्यमितिच॥
रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामेकोगम्यस्त्वमसिपयसामर्णवइव ७

महिम्न॰ टी॰ ४ 4 सतिपूर्षमार्गो सतिश्रहंकारोपीतास्तदनुष्ठायिनइतिब्रुवती यतइदंपरंतत्वंतस्मा
परतरमस्तिश्रदःपथ्यंगृह्यंच तस्मात्सेवनीयमस्ति कस्मात्रुचीनांवैचित्र्यात्श्र
तोरुचयोविचित्राःयद्रुतोएकमेवपरंतत्वमभिन्नंपरमार्थतः तदेवरुचिवैचित्र्यान्नाना
त्वंसमुपागते हेभगवन्रुजुकुटिलनानापथजुषांपयसांएकःश्रर्णवोयथागम्य
स्तथात्वं७॥ ॥ ॥ श्रीकृष्णायनमः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रहोहेवरद इयत्तंत्रोपकरणंमात्रापरिछदग्रहतंत्रंतदियत्किं महान्उक्षामहोक्षः
वृषभःखट्वांगंप्रसिद्धमेव श्रथदंडस्यउपरिबद्धकपालंखट्वांगमुच्यते तथापर
शुरायुधविशेषः श्रजिनगजचर्मतथाभस्मादग्धगोमयंतथाफणिनःकाद्रवेया
नागाः तथाकपालंच इतिशब्दः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनःकपालंचेतीयत्तववरद तंत्रोपकरणं
सुरास्तांतामृद्धिंदधतितुभवद्भूप्रणिहितांनहिस्वात्मारामंविषयमृगतृष्णाभ्रमयति ८॥
समाप्तोवर्त्तते तुपुनःसुरादेवाःभवद्भूप्रणिहितांभवद्भूत्तोयनीतांश्रनिर्वचनीयां
ऋद्धिंदधतिधारयति यद्येवंतर्हिकथंस्वयंनभुंक्ते नैवंवाच्यंहियस्मात्कारण ४

५A

त्वविषयमृगतृष्णास्वात्मारामंपुरुषंयोगिनंनप्रकृतिनचालयतिएतेनभगवतःपरम
योगित्वंप्रकटितं ८ ॥ ॥ ॥॥ हेभगवन्हेपुरमथनकश्चिद्बुद्धदर्शीनानुयायीस
कलंसमस्तंजगदिदंध्रुवंगदति अविनश्वरंकथयति अपश्चपरोवौद्धःदंभःक्षणंभ
गवादात्सकलंजगदिदंअध्रुवंक्षणिकंगदति हेभगवन्एतस्मिन्समस्तेपिजगतिव्यस्तवि
षयेसतिविस्मितप्रमाणेभूमौसत्यांअहतैर्महद्वौद्धादिभि ॥ ॥ ॥ ॥ ॥
ध्रुवंकश्चित्सर्वंसकलंमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्यस्तविषये स
मस्तेप्येतस्मिन्पुरमथनतैर्विस्मितइवस्तुवन्जिह्मेमित्वांनखलुननुधृष्टामुखरता ए
विस्मितइवविस्मितोत्यन्तोमोहंप्रापितइव त्वांस्तुवन्जिह्मेमिलज्जेअहोयद्येवंतर्हि
कथंस्तुतौप्रवर्त्तते सतिमिदं नन्वहोखलुनिश्चयेनमुखरतावाचालतानधृष्टा
अपितुधृष्टेव ए हेभगवन्विरंच्यौब्रह्माउपरितनपक्षेहरिःकृष्णःअधःपक्षेतवैश्व
र्यंयत्नात्परिछेत्तुंपरिकल्पयितुंअनलंयातौअसर्थीभूतौ कथंभूतस्यतवअनिल
स्कंधवपुषः अस्यएतेनकिमुक्तं वायुतत्वपर्यंतंलिंगस्यमस्तमस्तकंकालाग्नि

पर्यंतं लिंगस्य मूलं ब्रह्मांडव्याप्तिः विष्णुर्भगवान् अपतत् वनिवासी कथमेतौ तवै
महिम्न श्वर्यं परिज्ञातुं समर्थौ स्यातामिति अपि तु न भवत इत्यर्थः ततो नित्तरं तेन भगवता
टी० भ्यां ब्रह्मविष्णुभ्यां स्वयं तस्थे ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
५ तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः परिच्छेत्तुं जातावनलमनिलस्कंधवपुषः ततो
6 भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति १०
आत्मानमात्मनैव प्रकटयामासा किंकुर्वद्भ्यां भक्तिश्रद्धाभरगुरु यथा एवं गृणद्भ्यां
यद्यस्मात्कारणाद्भगवान् कारुणिकः कारुणिकत्वात् स्वयं तस्थे आत्मानमात्मनैव
प्रकटयामास हे गिरिश युक्तमेतत् अनुवृत्तिस्तव सेवा किं न फलति अपि तु फलत्ये
वेत्यर्थः संगतिः १० हे भगवन् दशास्यो रावणः बाहून् अभृत अधृतवान् कथंभूतान्बा
हून् रणकंडूपरवशान् संग्रामे व्यग्रान् किं कृत्वा अवैरिव्यतिकरनिष्कंटकं त्रिभुवनं अ
यत्नादासाद्य प्राप्य हे त्रिपुरदहन इदं तत् स्थिरायास्त्वद्भक्तेर्विस्फोर्ज्जितं विलसितं कथंभू
तायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरुहवलेः शिरांस्येव पद्मानि तेषां श्रेणीपंक्तिः
अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान् शिरः ५

5A

पद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं ॥११॥
तया रचितः आरोपितः चरणांभोरुहबलिः पूजोपहारो यस्याः सा पद्मश्रेणीरचितचर
णांभोरुहबलिस्तस्याः ११ हे भगवन् अमुष्य रावणस्य त्वदधिवसतौ कैलाशेपि भुज
वनं विक्रमयतः सतः पातालेपि प्रतिष्ठा अलभ्या आसीत् अप्राप्या बभूव कस्माद्बला
त् कथंभूतं भुजवनं त्वत्सेवासमधिगतसारं प्राप्तबलम्यं ॥ ॥कसति त्वयि अलसच
लितांगुष्ठशिरसि सति मंद चलितांगुष्ठे सति अहो युक्तमेतत् ध्रुवं निश्चितं खलो दुर्जनः
उपचितः सन् परया लक्ष्म्या अलंकृतः सन् मुह्यति मोहमुपगच्छति १२ हे वरद यद्बाण
वाणासुरः सुत्राम्णइंद्रस्य ऋद्धिं अधः अक्रे कथंभूतां ऋद्धिं परमोच्चैरपि सतीमत्यन्त
महतीमपि ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात् कैलाशेपि त्वदधिवसतौ विक्रमयतः
अलभ्या पातालेप्यलस चलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः १२
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे वाणः परिजनविधेयत्रिभुवनः ततश्चित्रं तस्मि
न्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः १३ ॥२॥ ॥ ॥

हे भगवन् तस्मिन् वाणे एतन्न चित्रं नाश्चर्यं कथंभूतो वाणः परिजनविधेयत्रिभुवनः

महिम्न टी ६

एतद्विशेषणं प्रथमं देयं पश्चादिदं कथंभूते वाणेत्वच्चरणयोर्वरिवसितरि त्वच्चरयोः पू
जयितरि हे भगवन् युक्तमेतत् त्वयि शिरसः अवनतिः शिरोनम्रता कस्यापि उन्नत्यै न
भवति अपि तु सर्वेषामेव ऐश्वर्यं भवतीति तात्पर्यार्थः १३ हे त्रिनयन नयः कल्माषः कृष्ण
पाण्डुरो वर्णः विषं संहृतस्तावेकं कंठे आसीत् स कल्माषः कंठे श्रियं न कुरुते अपि तु क
रोत्येव कथंभूतस्य तव अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्य अकांडे अ
प्रस्तावे ब्रह्माण्डक्षयेन चकिता भीता देवा असुरास्तेषु कृपाविधेयो यः कृपापरो यस्तस्य
अहो युक्तमेतत् भुवनभयभंगव्यसनिनः पुरुषस्य विकारापि श्लाघ्यः॥ १४ ॥ ॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषं संहृतव।
तः स कल्माषः कंठे तव न कुरुते श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यस
निनः १४ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः
स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः १५

हे भगवन् यस्य स्मरस्य बाणाः सदेवासुरनरे जगति असिद्धार्थाः अकृतप्रयोजनाः क्वचिदपि
नैव निवर्तन्ते स्मरस्त्वामितरसुरसाधारणं च यथा भवति अन्यदेवतुल्यं पश्यन् स्मर्तव्या
त्मासीत् अभूत् स्मरणीयशरीरो बभूव कथंभूता विशिखाः नित्यं जयिनो जययुक्ताः
अहो युक्तमेतत् वशिषु जितेन्द्रियेषु परिभावोऽपथ्यः न सुखकारीत्यर्थः॥ १५॥ ॥ राम ६

6A

हे भगवन्० त्वंजगद्रक्षायैनटसिनृत्यंकरोषि: जगतां रक्षणाय परक्षसां प्रतारणाय:नट
सिनृत्यंकरोषि पुनर्महीपृथिवीपादाघातात्पादक्षेपणचरणविन्यासत्सहसासंशयपदं
व्रजति किंबुद्ध्यतिकिमधः प्रविशतिइतिसंशयपदं तथाविष्णोःपरमाकाशंभ्राम्यद्भु
जपरिघरुग्नग्रहगणंवर्त्तते भ्राम्यद्भुजप्रहारेणभग्नग्रहगणांसमूहंवर्त्तते तथाद्यौः
स्वर्गःमुहुर्वारंवारंदौस्थ्यंयातिदुस्थतोयाति कथंभूताद्यौःअनिभृतजटाताडिततटाननुअहो
महीपादाघाताद्व्रजतिसहसासंशयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्नग्रहगणं मुहुर्द्यौ
र्दौस्थ्यंयात्यनिभृतजटाताडिततटा गजद्रक्षायैत्वंनटसिननुवामैवविभुता १६ वियद्व्यापीता
रागणगुणितफेनोद्गमरुचिः प्रवाहोवारांयःपृषतलघुदृष्टः शिरसितेजगद्वीपाकारंजलधि
वलयंतेनकृतमित्यनेनैवोन्नेयंधृतमहिमदिव्यंतववपुः १७ ॥ ॥ ॥ ॥ ॥ ॥
युक्तमेतत्युताविभुतावामैववैपरीत्यंविभुत्वं १६ हे भगवन्यो वारांपानीयानांप्रवाहःसते
तवशिरसिपृषतलघुदृष्टः जलकणिकावत्सूक्ष्मोदृष्टःकथंभूतोवियद्व्यापीव्योमप्रवहनशी
लः पुनःकिंभूतं तारागणगुणितफेनोद्गमरुचिः ताराणक्षत्राणितेषांसमूहः तेनगुणिताउ
पमिताफेनोद्गमरुचिःयस्यसः तेनप्रवाहेनजगद्वीपाकारंजलधिवलयंकृतं समुपरिषंचविद्वि
तं हे महिमइतिअमुनाप्रकारेणअनेनैवदृष्टान्तेनवपुःउन्नेयंअनुमापनीयंकथंभूतंवपुः दिव्यं
धृत

दिव्यप्रभावयुतं॥ १७ हे भगवन्तेतव त्रिपुरत्रियादिधक्षोरयंक आडंबरविधिः इयंका
महिम्न सामग्री इत्यादि इतीतिकिं क्षोणीपृथ्वीरथः तथायंतासासारथिः शतधृतिर्ब्रह्मा अगेंद्रः पर्व
टी० ७ तराजोहिमाचलोधनुः रथोनंतरंरथांगेचक्रस्थानेचंद्रार्कौ रथचरणपाणिर्विष्णुः शरः
अहोयुक्तमेतत् खलुनिश्चयेनप्रबुधियः स्वामीबुधयः विधेयैः पदादिःभिः ॥ ॥ ॥
रथाःक्षोणीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रार्कौरथचरणपाणिः शरइति दिधक्षो
स्तेकोयंत्रिपुरतृणमाडंबरविधिर्विधेयैःक्रीडन्त्योनखलुपरतंत्राःप्रभुधियः १८ हरिस्ते
साहस्रंकमलबलिमाधायपदयोर्यदेकोनेतस्मिन्निजमुदहरन्नेत्रकमलं गतोभक्त्युद्रेकःप
रिणतिमसौचक्रवपुषात्रयाणांरक्षायैत्रिपुरहरजागर्तिजगतां १९ ॥ ॥ ॥ ॥ ॥
१८ हे भगवन्हरिःकृष्णःतेतवपदयोःसाहस्रंकमलबलिंआधाय रचयित्वातस्मिन्साहस्रेएकोने
सतिनिजंनेत्रकमलंउदहरन्उत्पाटितवान्असौभक्त्योद्रेकः परिणतिगतःसन्त्रयाणांजगतां
रक्षायैजागर्तिस्फुरति केनचक्रशरीरेण १९॥ हे भवेगेन्जनोलोकःअतःकारणात्कर्मसुवि
षयेदृढपरिकरोदृढारंभोवर्तते किंकृत्वा श्रुतौवेदेश्रद्धांबद्ध्वापुनःकिंकृत्वा त्वांक्रतुषु
यागेषुफलदानप्रतिभुवंलग्नकंसंप्रेक्ष्य कृतोयागेसुप्तेविनष्टेसतिफलयोगेफलसंबं
धेजागर्षित्वमेववसावधानंभवसि कृत्वमतांयागयाजिनांपुरुषाणांप्रध्वस्तंकर्मपुरु राम
७

7A

षाराधनंविनाक्क फलति अपि तु न फलतीत्यर्थः २० हे शरणद हे अमयदक्षो मुनिः क्रिया
दक्षः क्रियायांकुशलः तथा क्रतुपतिः तनुभृतां अ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

क्रतौ सुप्ते जागरत्त्वमसि फलयोगे क्रतुमतां क्क कर्म प्रध्वस्तं फलति पुरुषाराधनमृते अतस्त्वां संप्रे
स्य क्रतुषु फलदान प्रतिभुवं श्रद्धां वद्धा दृढपरिकरः कर्मसु जनः २० क्रियादक्षो दक्षः क्रतु
पतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः क्रतुभ्रेषस्त्वत्तः क्रतुषु
फलदानव्यसनिनो ध्रुवं कर्तुः श्रद्धा विधुरमभिचाराय हि मखाः २१ ॥ ॥ ॥ ॥ ॥ ॥
धीशः तथा ऋषीणां आर्त्विज्यं ऋत्विग्भावः तथा सुरगणाः देवसमूहाः सदस्याः सभ्याः एवं साम
ग्रीकस्य दक्षस्य तत्त्वत्तः सकाशात् क्रतुभ्रंशो भूत् यागविनाशो बभूव कथंभूतात्त्वत्तः क्रतुषु फलविधा
नव्यसनिनः हि यस्मात्कारणात् युक्तमेतत् ध्रुवं निश्चितं मखाः यागाः कर्तुर्यजमानस्य श्रद्धावाह्य
अभिचाराय भवंति विपरीतार्थाय भवंति २१ हे नाथ हे स्वामिन् ते तव मृगव्याधरभसः आखेटको
त्साहः अमुं प्रजानाथं ब्रह्माणं अद्यापि न त्यजति कथंभूतस्य तव धनुःष्पाणेः कथंभूतं प्रजानाथं प्र
सभं बलात्कारेण रोहिद्भूतां रोहिणीभूतां स्वां दुहितरं प्रति रिरमयिषुं रंतुमिच्छुः
ऋषस्य वपुषा मृगशरीरेण गतं किं क
तुमिच्छुः रिरमयिषुमिच्छुः पुनः कथंभूतं अभिकं कामुकं अपरं कथंभूतं सपत्राकृतं वाणाभिघा

महिम्न टी० ८

तत्प्रार्थितं अपरं कथंभूतं त्रसंतं दिवमपि यातं यद्यपि त्रसंतं दिवमपि स्वर्गमपि गतं पुनस्तथापि ते
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा धनुष्पाणेर्यातं
दिवमपि सपत्राकृतममुं त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः २२ स्वलावण्याशंसाधृत
धनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि यदि स्त्रैणं देवी यमनिरतदेहार्द्ध
8 तव मृगव्याधरभसः अद्यापि प्रजानाथं न त्यजतीत्यर्थः २२ हे पुरमथन हे त्रिपुरदहन तथापि देवी
पार्वती त्वां स्त्रैणं स्त्रीलंपटं अवैति जनाति किं कृत्वा यद्यपि पुष्पायुधं कंदर्पं पुरोग्रे अह्नाय झटिति मेव
तृणवेत् प्लुष्टं दृष्ट्वा पुरमथं दग्धं दृष्ट्वापि यस्मात् यमनिरतदेहार्द्धघटनात् संपादनात् कथंभू
ता देवी स्वलावण्याशंसा स्वरूपाभिमानिनी अहो वत इति खेदे अद्धा निश्चितं हे वरद युवतयो मु
ग्धाः स्त्रियो अज्ञाना: २३ ॥ ॥ ॥ ॥ ॥ हे स्मरहर तव श्मशानेषु आसमंतात् भावेन क्रीडाः तथापि
शाचाः सहचराः नित्यं क्रीडाकारणः तथा चिताभस्मालेपः चिताभस्मना अंगरागः तथा स्त्रग
पि मालापि नृकरोटीपरिकरः नृणां यातिमस्तकानि तेषां निकरः तस्योटीपरिकरः शिरोवंध
नं यस्य सः अपि वा नृकरोटीपरिकरः नृकरो व्रह्मात स्योटीपरीयस्य सः नाम इति संवोधने
हे वरद एवं पूर्वोक्तप्रकारेण अ[illegible]खिलं समग्रं तव शील ममंगल्यं भवतु पुनस्तथापि त्वं स्मृ राम
तृणां चिंतकानां भक्तानां परममंगलं असि तथोक्तं च सुभाषितद्वारणास्यामतां वाहतियाति ८

४१

कुरंरंरवायांश्रयार्कविमवालरणांच तद्दोकिमपिवारिधरस्तुस्तुप्रीणितावतयेनजगंति २४ ॥

श्मशानेष्वाक्रीडाः स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपिनृकरोटीपरिकरः ॥ ॥
अमंगल्यंशीलंतवभवतुनामैवमखिलंतथापिस्मर्तॄणांवरदपरमंगलमसि २४ नमः प्रत्यक्चित्तेसवि
धमविधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः यदालोक्याह्लादं ह्रद इवनिम
ज्यामृतमयेदधत्यंतस्तत्त्वंकिमपियमिनस्तत्किलभवान् २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

हेभगवन्यमिनोयोगिनः मनोंतःकरणंचित्तेस्वात्मनिसविधंअवधायसमीपंकृत्वाप्रत्यक्पश्चात्अं
तर्मुध्येयत्किमपिअनिर्वचनीयंतत्त्वंआलोक्यदृष्ट्वाअह्लादंदधतिधारयंति किलइतितद्भवान्।
कथंभूताः यमिनः आत्तमरुतः आत्तोगृहीतो मरुद्वायुर्यैस्तेआत्तमरुतः पुनःकथंभूताः
प्रहृष्यद्रोमाणः ससरोमांचगात्राः अपरंकथंभूताः प्रमदसलिलोत्संगितदृशः प्रमदसलिलेनो
त्संगितापरिप्लुतादृष्टिर्येषांतेतथोक्ताः तत्रोत्प्रेक्षतेअमृतमयेह्रदेनिमज्ज्येव। आह्लादंधारयंतीव
यथाकश्चित्तापाक्रांतोअमृतमयेसुशीतलेह्रदेनिमज्ज्यअह्लादंदधाति इत्यर्थसंगतिः २५ ॥॥

हेभगवन्त्वंअर्कः सूर्यस्त्वंसूर्यश्चंद्रः त्वंपवनोवायुः असित्वहुतवहोग्निः त्वंआपः पानीयंत्वंव्यो
मआकाशंत्वमुधरणिः। आत्मात्वमितिचइतिशब्दः समाप्तोवर्त्तते हेभगवन्परिणताः परिप
क्वमतयस्त्वयिविषयेएवंपूर्वोक्तप्रकारेणपरिछिन्नाइयत्ताअवधारितांइयत्ताकलितांगिरंवि
भ्रतु पुनरिह जगतिवयंतत्त्वंनविद्मः यत्त्वंनभवसि यत्किंचित्सदसद्वातत्सर्वंभग
वानितिभगवद्व्यतिरिक्तंचिन्नास्तीतितात्पर्यार्थः २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥॥

स्त्व १

महिम्न टी० ए

तमर्कस्सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च परिछिन्ना
मथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति। तुरीयं ते धाम ध्वनिभिरवरुंधानमणु
भिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदं २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
हे भगवन् शरणद ओमिति पदं गृणाति स्तौति कथंभूतं ओमिति पदं। समस्तव्यस्तं समस्तव्यापकं किं कुर्वन् ओमि
तिपदं त्रयी वेदत्रयीं अभिदधत् न केवलं त्रयीति स्त्रो वृत्तीश्च। उदात्तानुदात्तसमाहारभेदात् न केवलं तिस्रो
१ वृत्तीस्त्रिभुवनं स्वर्गमृत्युपातालं च पुनः किं कुर्वन् आकाराद्यैः अकारोकारमकारैस्त्रिभिर्वर्णैः त्रीनपि
सुरान् ब्रह्मविष्णुरुद्रान् अभिदधत्। किं कुर्वाणं ओमिति पदं अणुभिर्ध्वनिभिस्ते तव तुरीयं धाम अव
रुंधाणं स्वीकुर्वाणं किमपेक्षया तुरीयं धामेति हृदयात्कंठं यावत् जाग्रवेदस्यायाव्याप्तिः कंगत्तालु
पर्यंतं स्वप्नावस्थायाव्याप्तिः तात्वादिललाटपर्यंतं सुषुप्तावस्थायाव्याप्तिः ललाटाच्च कुंडलिनी
व्याप्य शिवतत्वपर्यन्तं तुर्यावस्थायाव्याप्ति एव तिष्ठते॥ तत्रानाहतोन्यदोन्मुक्ति दः परिकीर्तितः।
कथंभूतं तुरीयं धाम तीर्णविकृतिः तीर्णाः परित्यक्ता विकारादयो यस्य तत्तीर्णविकृति निर्विकारमित्य
र्थः २७ ॥ ॥ ॥ हे भगवन् यत् इदं तव अभिधानाष्टकं अमुष्मिन् अभिधानाष्टके श्रुतिर्वेदः प्रत्येकं
प्रविचरति तत्किं अभिधानाष्टकं भवः शर्वः रुद्रः पशुपतिः अथोग्रः सह महान् शब्देन महादेवः उ
च्यते तथा भीमेशानौ अमुष्मिन् प्रत्येकं श्रुतिरपि चरति किमर्थं अस्मै धाम्ने प्रियाय प्रीत्यर्थं हे भगव
न् एवंरूपाय भवते तुभ्यं प्रणिहित नमस्योस्मि छ तन नमस्कारोस्मि २८ ॥ ॥ ॥ ॥ ॥ ॥
भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकं प्र
विचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते २८ नमो नेदिष्ठाय प्रियदव दविष्ठा

य १

सर्वं त्वमिति परिणतानि बिभ्रतु गिरं न विद्मस्तत्त्वं वयमिह तु यत्त्वं न भवसि २६ त्रयीं तिस्रो वृत्तीस्त्रिभुवन ॥१॥

राम ८

9A

यच्चनमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय नमः नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः स
र्वस्मै ते तदिदमिति शर्वाय च नमः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
हे प्रियदव भक्तानां प्रियं दुनोतीति प्रियदव ते तुभ्यं दिष्ठाय निकटवर्त्तिने नमः दविष्ठाय च नमः दूरस्था
य च नमः हे स्मरहर तुभ्यं क्षोष्ठाय नमः सूक्ष्मरूपाय नमः च अन्यत् ते तुभ्यं महिष्ठाय नमः महते इष्टा
य पूजाय नमः अपरं वर्षिष्ठाय त्यतावृद्धरूपाय नमः हे त्रिनयन ते यविष्ठाय च नमः तरुणाय नमः
हे भगवन् तुभ्यं सर्वस्मै सर्वप्रकाशाय नमः तदिति वाक्योपसंहारे ते तुभ्यं शर्वाय च नमः २९ ॥॥
हे भगवन् विश्वोत्पत्तौ वह लरजसे प्रचुररजोगुणाधिष्ठानाय भवाय नमो नमः तत्संहारे
ना प्रबलतमसे प्रबलतमोगुणाधिष्ठाय हराय नमो नमः अपरं सर्वोत्पत्तौ सतिगुणाधिष्ठाने सति
जनसुखकृते जगत्संरक्षणे तैते मृडाय नमो नमः निस्त्रैगुण्ये गुणत्रयातीताय प्रमहसिपदे मु
क्तिमार्गे युक्तिस्थाने शिवाय नमो नमः ३० ॥॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
बहललरजसे विश्वोत्पत्तौ भवाय नमो नमः जनसुखकृते सत्वोत्पत्तौ मृडाय नमो नमः प्रबलतमसे
तत्संहारे हराय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ३० कृशपरिणति चेतः क्लेशव
श्यं क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः इति चकितममंदीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते
हे वरद भक्तिर्मां इति अमुना प्रकारेण चकितं भीतं अमंदीकृत्य प्रोत्सहतो तव चरणयोर्वाक्यपुष्पोप
हारं आधाद्रचितं इति किं मदीयं चेतः कृशपरिणति परिणामदुर्बलं पुनः कथंभूतं क्लेशवश्यं
अविद्या अस्मिता रागद्वेष अभिनिवेशाः पंचक्लेशास्तेषां वश्यं क्लेशवश्यं विपरीतज्ञानमविद्या
भिन्नयोर्बुद्ध्यात्मनोरेकत्रप्रीतिरस्मिता सुखे ष्वासक्तता रागः दुःखेषु अप्रीतिर्द्वेषः अनुभूतादपि

मरणादेस्त्रासोभिनिवेशइतिक्लेशाः कथंभूतारुद्धिगुणसी ३१ ॥ ॥हेईशहेस्वामिन्असि
तगिरिसमंस्यात्कज्जलंगिरितुल्यंकज्जलंस्यात् कं सिंधुपात्रे यदिसुरतरुवरशाखालेखनीस्या
त् यदिशारदासरस्वतीउर्वीपत्रंगृहीत्वासर्वकालंलिखति तदपितवगुणानांपारंनयाति
३२ इतिश्रीमहिम्नःस्तोत्रटीकासमाप्ता ॥ ॥असुरसुरमुनींद्रैरर्चितस्येंदुमौलेग्रथितगुण
महिम्नोनिर्गुणस्येश्वरस्य सकलगुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्र
मेतच्चकार ३३ कुसुमदशननामासर्वगंधर्वराजः शशिधरवरमौलेर्देवदेवस्यदासः सुगु
रुनिजमहिम्नोभ्रष्टएवास्यरोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ३४ सुरवरमुनिपूज्यंस्वर्गमोक्षैकहे
असितगिरिसमंस्यात्कज्जलंसिंधुपात्रे सुरतरुवरशाखालेखनीपत्रमुर्वी लिखतियदिगृहीत्वा
शारदासर्वकालंतदपितवगुणानामीशपारंनयाति ३५ हेतुंपठति यदिमनुष्यः प्रांजलिर्नान्यचे
ताः व्रजतिशिवसमीपंकिन्नरैः स्तूयमानः स्तवनमिदममोघंपुष्पदंतप्रणीतं ३६ ॥ ॥ ॥ ॥ स्वर्गः ॥
महेशान्नापरोदेवोमहिम्नोनापरस्तुतिः अघोरान्नापरोमंत्रोनास्तितत्वंगुरोःपरं ३७ श्रीपुष्पदन्त
मुखपंकजनिर्गतेनस्तोत्रेणकिल्बिषहरेणहरप्रियेण कंठस्थितेनपठितेनगृहस्थितेनसुप्रीणितो
भवतिभूतपतिर्महेशः ३८ दीक्षादानंतपस्तीर्थंध्यानमिज्यादिकाः क्रियाः महिम्नःस्तवपाठस्य
कलांनार्हन्तिषोडशीं ३९ इतिश्रीगंधर्वराजपुष्पदन्तविरचितंमहिम्नस्तोत्रंसमाप्तम् ॥ ॥
॥शुभमस्तुसर्वजगताम् ॥ संवत् १९११मितीकार्तिकशुदि ९ नवम्यां बृहस्पतिवारादिसंयुक्ता
यांलिखितंकाशीरामसुक्ले ॥ [illegible] ॥ ॥ ॥ ॥ ॥ शुभमस्तु ॥ शुभंभूयात् ॥ ॥ राम

१०